श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीनृसिंहाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीनृसिंहाष्टोत्तरशतनामस्तोत्रम् ॥

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्युमृत्युन्नमाम्यहम्॥

गर्जन्तं गर्जयन्तं निजभुजपटलं स्फोटयन्तं हठन्तं
रूप्यन्तं तापयन्तं दिवि भुवि दितिजं क्षेपयन्तं क्षिपन्तम्।
क्रन्दन्तं घोषयन्तं दिशि दिशि सततं संहरन्तं भरन्तं
वीक्षन्तं घूर्णयन्तं करनिकरशतैर्दिव्यसिंहं नमामि॥

नारसिंहो महासिंहो दिव्यसिंहो महाबलः।
उग्रसिंहो महादेवः स्तम्भजश्चोग्रलोचनः॥ 1 ॥

रौद्रः सर्वाद्भुतः श्रीमान् योगानन्दस्त्रिविक्रमः।
हरिः कोलाहलश्चक्री विजयी जयवर्धनः॥ 2 ॥

पञ्चाननः परब्रह्म चाघोरो घोरविक्रमः।
ज्वलन्मुखो ज्वालमाली महाज्वालो महाप्रभुः॥ 3 ॥

निटिलाक्षः सहस्राक्षो दुर्निरीक्ष्यः प्रतापनः।
महादंष्ट्रायुधः प्राज्ञश्चण्डकोपी सदाशिवः॥ 4 ॥

हिरण्यकशिपुध्वंसी दैत्यदानवभञ्जनः।
गुणभद्रो महाभद्रो बलभद्रः सुभद्रकः॥ 5 ॥

कराळो विकराळश्च विकर्ता सर्वकर्तृकः।
शिंशुमारस्त्रिलोकात्मा ईशः सर्वेश्वरो विभुः॥ 6 ॥

भैरवाडंबरो दिव्यश्चाच्युतः कविमाधवः।
अधोक्षजोऽक्षरः शर्वो वनमाली वरप्रदः॥ **7** ॥

विश्वंभरोऽद्भुतो भव्यः श्रीविष्णुः पुरुषोत्तमः।
अनघास्त्रो नखास्त्रश्च सूर्यज्योतिः सुरेश्वरः॥ **8** ॥

सहस्रबाहुः सर्वज्ञः सर्वसिद्धिप्रदायकः।
वज्रदंष्ट्रो वज्रनखो महानन्दः परन्तपः॥ **9** ॥

सर्वमन्त्रैकरूपश्च सर्वयन्त्रविदारणः।
सर्वतन्त्रात्मकोऽव्यक्तः सुव्यक्तो भक्तवत्सलः॥ **10** ॥

वैशाखशुक्लभूतोत्थशरणागतवत्सलः।
उदारकीर्तिः पुण्यात्मा महात्मा चण्डविक्रमः॥ **11** ॥

वेदत्रयप्रपूज्यश्च भगवान् परमेश्वरः।
श्रीवत्साङ्कः श्रीनिवासो जगद्व्यापी जगन्मयः॥ **12** ॥

जगत्पालो जगन्नाथो महाकायो द्विरूपभृत्।
परमात्मा परञ्ज्योतिर्निर्गुणश्च नृकेसरी॥ **13** ॥

परतत्त्वं परन्धाम सच्चिदानन्दविग्रहः।
लक्ष्मीनृसिंहः सर्वात्मा धीरः प्रह्लादपालकः॥ **14** ॥

इदं श्रीमन्नृसिंहस्य नाम्नाम् अष्टोत्तरं शतम्।
त्रिसन्ध्यं यः पठेद्भक्त्या सर्वाभीष्टमवाप्नुयात्॥ **15** ॥

॥ इति श्रीलक्ष्मीनृसिंहाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥